# A-III/1/22AVYS3CCTC1/23

## तृतीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-24)

## व्याकरणम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. अधातुरित्यादौ पर्युदासः प्रसज्यप्रतिषेधो वा ?
2. उभयसूत्रसाधारणमर्थवत्त्वं किमस्ति ?
3. पूर्वसूत्रेण सिद्धे समासग्रहणं किमर्थम् ?
4. वाक्यस्य प्रातिपदिकत्वे को दोषः ?
5. किन्नाम परिनिष्ठितत्वम् ?
6. किन्नाम तन्त्रम् ?
7. एकशेषविधायकसूत्रे 'सरूपाणाम्' इति पदं किमर्थम् ?
8. 'बहुवचने झल्येत्' इति सूत्रे बहुवचनपदस्य किं प्रयोजनम् ?
9. 'आतो धातोः' इति सूत्रे धातुपदं किमर्थम् ?
10. नप्त्रादिग्रहणेन किं नियम्यते ?
11. वाचा इत्यादौ कया परिभाषया स्वादयो भवन्ति ?
12. 'अतोऽम्' इत्यत्र 'म' इतिच्छेदे को दोषः ?
13. 'यस्येति च' इति सूत्रस्थस्य 'यस्य' इत्यस्य को विग्रहः ?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. नभवधाद्यादेशानां प्रत्ययसंज्ञा कथं न भवतीति उपस्थापयत।
15. 'परश्च' इति सूत्रस्य नियमार्थत्वमुपपादयत।

16. 'जसः शी' इति शित्त्वात्सर्वादेशः, अनेकाल्त्वाद्वा नागेशमतमुपस्थापयत।

17. 'न बहुव्रीहौ' इति सूत्रं व्याख्यात।

18. 'सम्बुद्धौ च' इति सूत्रं व्याख्यात।

19. 'अतोऽम्' इत्यत्र 'अम्' इतिच्छेदो 'म' इतिच्छेदो वा स्पष्टयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. 'कृत्तद्धितसमासाश्च' इति सूत्रं व्याख्यात।

21. 'पतिः समास एव' इति सूत्रमवलम्ब्य निबन्धात्मकमुत्तरं लिखत।

22. 'ङिति ह्रस्वश्च' इति सूत्रं सोदाहरणं व्याख्यात।

# A-III/2/22AVYS3CCTC2/23

## तृतीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-25)

## व्याकरणम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

## खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. किन्नाम पुंस्त्वम्?
2. लौकिकलिङ्गलक्षणं लिखत।
3. 'अजाद्यतः' इत्यत्र का विभक्तिः?
4. अजादिषु अकारान्तपाठः किमर्थः?
5. 'पञ्चाजी' इत्यस्य को विग्रहः?
6. 'चटका' इत्यत्र इत्वं कथं न भवति?
7. 'उगितश्च' इति सूत्रस्य किमुदाहरणम्?
8. 'मनः' इति सूत्रस्य कोऽर्थः?
9. 'कारिका' इत्यत्र इत्वं केन सूत्रेण भवति?
10. 'न यासयोः' इति सूत्रेण कस्य निषेधः क्रियते?
11. 'टिड्ढा०' इति सूत्रे 'ठे' इत्येव सिद्धे ठक्ठञोरुपादानं किमर्थम्?
12. किन्नाम वयः?
13. 'यूनस्तिः' इति कस्य अपवादः?

## खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. शूद्रा, शूद्री, महाशूद्री इत्येतेषामर्थभेदं प्रत्ययभेदं चोपस्थापयत।
15. 'पञ्चाजी' इत्यत्र टाप्प्रत्ययः कथं न भवतीति उपस्थापयत।

16. 'वयसि प्रथमे' इति सूत्रं व्याख्यात।

17. सत्त्वे निविशतेऽपैति पृथग् जातिषु दृश्यते।

    आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः॥ इति कारिकां व्याख्यात।

18. 'पुंयोगादाख्यायाम्' इति सूत्रं व्याख्यात।

19. 'नृनरयोर्वृद्धिश्च' इति गणसूत्रं सोदाहरणं व्याख्यात।

## खण्डः - ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. 'स्त्रियाम्' इति सूत्रं व्याख्यात।

21. 'वक्ष्यमाणा' इत्यत्र ङीब्वारणोपायमुपस्थापयत।

22. सोदाहरणं जातिलक्षणमुपस्थापयत।

# A-III/3/22AVYS3CCTC3/23

## तृतीयसत्रार्द्धः

## तृतीयपत्रम् (DSCC-26)

## व्याकरणम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. 'परिभाषेन्दुशेखरः' इत्यस्य विग्रहं लिखत।
2. इण्प्रत्याहारः पूर्वेण णकारेण परेण वा ?
3. 'अनेकाल्शित्सर्वस्य' इति शिद्ग्रहणेन का परिभाषा ज्ञाप्यते ?
4. 'अध्येता' इत्यत्र गुणनिषेधः कथं न भवति ?
5. यदागमपरिभाषाया अवतरणं किम् ?
6. किन्नाम निर्दिश्यमानत्वम् ?
7. प्रमाणत आन्तर्यस्य किमुदाहरणम् ?
8. 'अर्थवद्ग्रहणे नानर्थकस्य' इत्यस्या अपवादभूता परिभाषा का अस्ति ?
9. गवे हितम्=गोहितम् इत्यत्र अवादेशः कथं न भवति ?
10. 'स्त्रीप्रत्यये चानुपसर्जने न' इति परिभाषाया अर्थः कः ?
11. 'तरप्तमपौ घः' इति सूत्रेण तरबन्तादेः घसंज्ञा कथं न भवति ?
12. 'व्यपदेशी' शब्दस्य कोऽर्थः ?
13. तदन्तविधेरपवादभूता परिभाषा काऽस्ति ?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. 'अनुबन्धा एकान्ताः' इति सिद्धान्तपक्षमुपस्थापयत।
15. निर्दिश्यमानपरिभाषाया अवतरणपूर्वकं सिद्धिप्रकारं वर्णयत।

16. 'अर्थवद्ग्रहणे नानर्थकस्य' इति परिभाषां सावतरणमुपस्थापयत।
17. 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' परिभाषामिमां व्याख्यात।
18. 'सर्वो द्वन्द्वो विभाषयैकवद्भवति' इति परिभाषामुपस्थापयत।
19. 'प्रकृतिवदनुकरणं भवति' सावतरणं परिभाषामिमामुपस्थापयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्' इति परिभाषां व्याख्यात।
21. 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति परिभाषां व्याख्यात।
22. 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' इति परिभाषामुपस्थापयत।

# A-III/4/22AVYS3CCTC4/23

## तृतीयसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-27)

## व्याकरणम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. शम्भुमते कति वर्णाः सन्ति ?
2. वर्णानाम् अष्टौ स्थानानि लिखत।
3. अर्वाचीनमते विज्ञानं नाम किम् ?
4. निरुक्तेन किं क्रियते ?
5. भाषायाः परिभाषा का ?
6. पशुपक्षिणामव्यक्ते शब्दे को धातुः प्रयुज्यते ?
7. नैयायिकानां मते शब्दनिष्पत्तिः कथं भवति ?
8. शब्दनित्यत्ववादिनः के सन्ति ?
9. शब्दानित्यत्ववादिनः के सन्ति ?
10. वाचश्चतुरो भेदान् लिखत।
11. का नाम वैखरी ?
12. अपभ्रंशादपि साक्षादर्थबोधं के स्वीकुर्वन्ति ?
13. अस्वगोण्यादयः शब्दाः विषयान्तरे साधवः सन्ति, असाधवो वा ?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।

    भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत्॥ –इति कारिकां व्याख्यात।

15. भाषाविज्ञानं किं भवतीति संक्षेपेणोपस्थापयत।

16. शब्दानित्यत्वं संक्षेपेणोपस्थापयत।

17. तितउशब्दस्य निर्वचनं लिखत।

18. संवृतादीन् वर्णदोषान् लिखत।

19. ध्वनिविषये संक्षेपेण लिखत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. 'आत्मा बुद्ध्या० ' इत्यादिना वर्णोत्पत्तिप्रक्रियां लिखत।

21. भाषोत्पत्तिविषयकानि विविधमतानि लिखत।

22. भाषाविकारहेतून् संक्षेपेण लिखत।